**II Semester B.Com. Examination, April/May 2015**
**(Freshers) (CBCS) (2014-15 & Onwards)**
**LANGUAGE SANSKRIT – II**
**Harshacharita, Grammar and Translation**

Time : 3 Hours                                                                 Max. Marks : 70

***Instructions :*** *1) Answer in* ***Sanskrit****,* ***Kannada*** *or* ***English****.*
*2) Answer Q.* ***I*** *and* ***VI*** *in* ***Sanskrit only****.*

I. समीचीनं उत्तरं चिनुत ।                                                  **(10×1=10)**

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ :

Choose the correct answer :

1) बाण: कस्य आस्थाने आसीत् ?

अ) दुष्यन्तस्य   आ) हर्षवर्धनस्य   इ) कुबेरस्य   ई) रामस्य

2) बाणस्य पिता का ?

अ) कुबेर:   आ) अच्युत:   इ) ईशान:   ई) चित्रभानु:

3) बाणस्य जन्मस्थानं किम् ?

अ) प्रीतिकूटम्   आ) स्थाण्वीश्वर:   इ) यष्टिगृह:   ई) कनकगृह:

4) सुदृष्टि: किं पुराणं पपाठ ?

अ) शिव   आ) विष्णु   इ) वायु   ई) स्कन्द

5) कस्य चरितं श्रोतुं मन: न कुतूहलि ?

अ) महात्मनां   आ) दुरात्मनां   इ) नीतिवन्तानां   ई) साधकानां

6) क: हर्षचरितं कथयितुं पृच्छति ?

अ) गणपति   आ) तारापति   इ) अधिपति:   ई) इयामल:

7) मदनरसाविष्ट: पाण्डु: कुत्र प्राणान् मुमोच ?

अ) बन्धुमध्ये   आ) वनमध्ये   इ) शालामध्ये   ई) शत्रुमध्ये

8) दृष्टरामोन्मादेन कः मृत्युमवाप ?
अ) लक्ष्मणः आ) सुमन्त्रः इ) रावणः ई) दशरथः

9) श्रीकण्ठदेशस्य राजधानी का ?
अ) स्थाण्वीश्वरः आ) इन्द्रप्रस्थः इ) अलकापुरी ई) हस्तिनावतिः

10) हर्षचरितं किं प्रकारकं काव्यम् ?
अ) कथा आ) आख्यायिका इ) चम्पू ई) नाटकम्

II. द्वयोः प्रश्नयोः उत्तरं लिखत। **(2×10=20)**
ಎರಡು ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಿಸಿ:
Answer **any two** questions :

1) बाणभट्टस्य जीवन-काल-कृतयः।
ಬಾಣಭಟ್ಟನ ಜೀವನ, ಕಾಲ ಮತ್ತು ಕೃತಿಗಳು.
Life, date and works of Banabhatta.

2) बाणभट्ट-ब्राह्मणानां (बन्धूनां) सम्भाषणम्।
ಬಾಣಭಟ್ಟ ಮತ್ತು ಬ್ರಾಹ್ಮಣರ (ಬಂಧುಗಳ) ಸಂಭಾಷಣೆ.
Converstion between Banabhatta and the Brahmins.

3) श्रीकण्ठजनपदवर्णनम्।
ಶ್ರೀಕಂಠದೇಶದ ವರ್ಣನೆ.
The description of Sreekanthadesha.

III. एतत् गद्यभागम् **कन्नड**भाषया **आंग्ल**भाषया वा अनुवदय। **(1×12=12)**
ಈ ಗದ್ಯಭಾಗವನ್ನು **ಕನ್ನಡ** ಅಥವಾ **ಆಂಗ್ಲ**ಭಾಷೆಗೆ ಅನುವಾದಿಸಿ.
Translate this prose passage into **Kannada** or **English**.

अथ तेषां कनीयान् कमलदलदीर्घलोचनः श्यामलो नाम बाणस्य प्रेयान्प्राणानामपि वशयिता दत्तसंज्ञस्तैः सप्रणयं दशनज्योत्स्नास्नपितककुभा मुखेन्दुना बभाषे – "तात बाण, द्विजानां राजा गुरुदारग्रहणमकार्षीत्। पुरूखा ब्राह्मणधनतृष्णया दयितेनायुषा व्ययुज्यत। नहुषः परकलत्राभिलाषी महाभुजङ्ग आसीत्। ययातिराहितब्राह्मणीपाणिग्रहणः पपात। सुद्युम्नः स्त्रीमय एवाभवत्। सोमकस्य प्रख्याता जन्तुवधनिर्घृणता। मान्धाता मार्गणव्यसनेन सपुत्रपौत्रो रसातलमगात्।

अथवा / ಅಥವಾ / OR

समुपलब्धभूपालसंमानातिशयपरितुष्टाः तस्य ज्ञातयः श्लाघमाना निर्ययुः। क्रमेण च कांश्चिदभिवादयमानः, कैश्चिद्रभिवाद्यमानः, कैश्चिच्छिरसि चुरब्यमाणः, कांश्चिन्मूर्ध्नि समाजिघ्रन्, कैश्चिदालिङ्ग्यमानः, कांश्चिदालिङ्गन्, अन्यैराशिषानुगृत्यमाणः, परानुगृह्णन्, बहुबन्धुमध्यवर्ती परं मुमुदे। संभ्रान्तपरिजनोपनीतं चासनमासीनेषु गुरुषु भेजे। भजमानश्चाचार्यादिसत्कारं नितरां ननन्द। प्रीयमाणेन च मनसा सर्वांस्तान्पर्यपृच्छत्।

IV. द्वयोः वाक्ययोः ससन्दर्भं विवृणुत। **(2×4=8)**

ಎರಡು ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.

Explain with reference to context **any two** sentences.

1) यथाकालमधीयते वा वटवः।

2) हर्षचरितादभिन्नं प्रतिभाति हि मे पुराणमिदम्।

3) कस्य न द्वितीयमहाभारते भवेदस्य चरिते कुतूहलम्।

4) एकदेशे तु यदि कुतूहलं वः, सज्जा वयम्।

V. द्वयोः लघुटिप्पणीं लिखत। **(2×2½=5)**

ಎರಡನ್ನು ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿ ಬರೆಯಿರಿ :

Write short notes on **any two** :

1) शरदृतुवर्णनम्।

2) कथा–आख्यायिका।

3) दण्डिनः दशकुमारचरितम्।

4) स्थाण्वीश्वरवर्णनम्।

VI. संस्कृतभाषया उत्तराणि लिखत।

a) पञ्चानां समासानां विग्रहवाक्यं कृत्वा समासनाम लिखत। **(5×1=5)**

ಐದು ಸಮಾಸಗಳಿಗೆ ವಿಗ್ರಹವಾಕ್ಯವನ್ನು ಬರೆದು ಸಮಾಸದ ಹೆಸರನ್ನು ಸೂಚಿಸಿ.

Dissolve **any five** compounds and name the Samasa.

1) पार्वतीपरमेश्वरौ  2) अधर्मः

3) यथाविभवम्  4) पीताम्बरः

5) पञ्चवटी  6) राजपुरुषः

7) नीलोत्पलम्  8) गुरुदक्षिणा

b) द्वयो: वाक्ययो: प्रयोगं परिवर्तयत। **(2x2½=5)**

ಎರಡು ವಾಕ್ಯಗಳ ಪ್ರಯೋಗ ಬದಲಾಯಿಸಿ.

Change the voice (**any two**) :

1) माता फलं ददाति।

2) आरक्षक: चोरं दण्डयति।

3) त्वया जलं पीयते।

VII. कन्नडभाषया आंग्लभाषया वा अनुवदत। **5**

ಕನ್ನಡ ಅಥವಾ ಆಂಗ್ಲಭಾಷೆಗೆ ಅನುವಾದಿಸಿ.

Translate into **Kannada** or **English**.

अस्ति गोदावरीतीरे विशाल: शाल्मलीतरु:। तत्र नानादिग्देशादागत्य रात्रौ पक्षिण: निवसन्ति। अथ कदाचित् अवसन्नायां रजन्यां अस्ताचलचूडालम्बिनि भगवति चन्द्रमसि लघुपतनको नाम वायस: प्रबुद्ध: सन् कृतान्तमिवायान्तं व्याधम् अपश्यत्। तमालोक्य अचिन्तयत्–''कथं अद्य प्रातरेव अनिष्टदर्शनम्'' इति।

---